No. ४२९६

Title शास्त्र दीपिका १म अध्याय २य पाद:

Author श्री पार्थ सारथि मिश्र:

Extent ५ Age १

Subject मीमांसा शास्त्रं

शास्त्रदीपिका प्रथमाध्याय द्वितीयपादः

५२८७

प्रासाददीपिका प्रथमाध्याय पत्रे ४८ १

४४३ पत्रे

श्रीगणेशायनमः श्रीमहालक्ष्म्यैनमः श्रीरामायनमः अविघ्नमस्तु आम्नायस्यक्रियार्थत्वादानर्थक्यमतदर्थानांतस्मादनित्यमुच्यते अथा
तोधर्मजिज्ञासेत्यत्र प्रमाणस्वरूपसाधनफलैः साभासैर्धर्माजिज्ञास्यत्वेनप्रतिज्ञातः तत्रास्मिन्नध्यायेप्रमाणंनिरूप्यते किंप्रमाणंधर्मइ
तिनयदेवकिंचिद्धर्मप्रमाणनिरूपणं अर्थवादमंत्रस्मृतिनामधेयादिगोचरंतत्सर्वमत्रैवसंगतं नत्वत्र चोदनाप्रामाण्यसाधनंलक्षणा
र्थेयेनस्मृत्यादेरसंगतिःस्यात् किंतर्हिधर्मप्रमाणनिरूपणं तदुक्तंभाष्यकृता। कोधर्मःकथंलक्षणकइति। सर्वस्मिंश्चाध्यायेतदेवक्रिय
तइतिसमस्तमध्यायंप्रमाणलक्षणमाचक्षतइति। तेनलक्षणसंगतिस्तावत्सिद्धा। प्रकृतसंगतिरपिचोदनानांप्रामाण्येयदपदार्थसं
बंधौत्पत्तिकत्वेनवाक्यार्थप्रतीतेर्मूलत्वतयाचोपपादिते। नंतराधिकरणेवेदद्वारेणतासांपौरुषेयत्वमाशंकितं। यथोक्तंभाष्यकारेण।
संनिकृष्टकालावेदाइदानींतनास्तेचचोदनासंघाः तत्रपौरुषेयाश्चेद्वेदाःप्रसंशयं पौरुषेय्यश्चोदनाइत्येवमाशंक्यवेदापौरुषेयतयातद
वयवानांचोदनानामथपौरुषेयतयाप्रामाण्यंप्रतिपादितं। एवंचोदनानांवेदावयवानांप्रामाण्येसाधितेतदवयवत्वेनोपस्थितानामर्थ
वादादिभागानामप्यपौरुषेयत्वसामान्याच्चोदनावत्प्रसक्तंप्रामाण्यमस्तिनवेतिचिंत्यतइति। तदिदमुक्तं। सिद्धप्रमाणभावस्यधर्मेवेदस्यसर्वशः राम

विध्यर्थवादमंत्राणामुपयोगो वुनोच्यत इति। अस्यार्थः। सिद्धप्रमाणभावं चोदनांशं वेदं त्रिधा विभज्य किं तावन्मात्रस्यैव प्रामाण्यं उत सकल
स्येति विचार्यते। न विधेरेव किंतु विध्यर्थवादमंत्राणां सर्वेषामेव सर्वशः सर्वप्रकारं विधिस्तुतिस्मृतिभिर्धर्मप्रतीतौ उपयोगः प्रतिपाद्यत इति।
किं तर्हि विध्यादीनां सर्वेषामुपयोगोऽस्ति न विधेरेवेति प्रतिपाद्यत इति। नामधेयाभिप्रायं वा विधिग्रहणं। यद्वा अर्थवादमंत्रयोः स्तुतिस्मृ
तिभ्यामुपयोगे ऽर्थाद्विधेरपि सामान्यसिद्धमुपयोगित्वं साक्षाद्विधानेन विशेषरूपेण साधितं भवतीत्यभिप्रायः औदुंबराधिकरणे वा वि
ध्युपयोगः प्रतिपाद्यत इत्यभिप्रायः अत्रास्मिन्नेव सूत्रे विध्यतिरिक्तानां सर्वेषामानर्थक्यं पूर्वपक्षी क्रियते। सिद्धांते च स्वाध्यायवि
धिवशादेवार्थवत्तया भवितव्यमित्येतावत्साधारण्येनैवाभिधास्यते। पश्चात्तु क्रमेणास्त्याद्युपयोग इति वेदितव्यं तत्र प्रथममर्थवा
देष्वेव सिद्धांतकथनात्तानेवोदाहृत्य चिंत्यते। वायुर्वै क्षेपिष्ठा देवतेत्येवमादीनि यानि विभावनातदंशात्यातिरिक्तार्थानि तानि किं धर्मे प्र
माणमुत नेति संशयः। तदर्थमिदं विचारयितव्यं किं विध्युद्देशेनैषामेकवाक्यत्वमुत भिन्नवाक्यतेति तत्सिद्ध्यर्थमप्येतच्चिंतनीयं किं
विध्युद्देशार्थवादयोः परस्पराकांक्षास्ति नवेति तत्रैवं पूर्वः पक्षः अर्थवादा निराकांक्षा भूतार्थप्रतिपादनात् विध्युद्देशाः समाप्यंते विधि

शार्थविधानतः यथाश्रुतिगृहीतानि तावत्संतमसंतं वा भूतमर्थमन्वाचक्षते। न धर्माधर्मौ न चाध्याहारादिनिरस्तत्वनियादनं अपरिपूर्णेषु
२ खल्वध्याहारादयः परिपूर्णानि चैतानि। स एवैनं भूतिं गमयतीति विशिष्टार्थप्रतिपादनादर्थान्तराकांक्षाभावात्· अनाकांक्षत्वादेव
चनसंनिहितेनापि वायव्यं श्वेतमालभेतेत्यनेनैकवाक्यता। विशिष्टार्थप्रतिपादनमेव पदानां लोके कार्यमवधारितं न प्रयोजनवद
र्थप्रतिपादनं येन तत्स्विक्षपाविध्येकवाक्यताकल्प्येत। आख्यायिकारूपाणां बहुलमुपलब्धेर्लोके स्वाध्यायविधिवशाद्दस्य कृत्स्न
स्य प्रयोजनवदर्थपर्यवसानमिति चेत् नादृष्टार्थस्तेनानुसर्तव्यो न तद्दृष्टेनार्थकल्पनात् दूरमदृष्टार्थताऽध्ययनस्य। तन्न तावद
र्थवादानामाकांक्षा। नापि विध्युद्देशस्य। तस्यापि विशिष्टभावनाविधानेन निराकांक्षत्वात्· न च प्रवर्तनाय प्राशस्त्यापेक्षा· विधित
एवानपेक्षात्समीहितसाधनभावावगमेन प्रवृत्तिसिद्धेः न चार्थवादैः प्राशस्त्यं प्रतिपाद्यते भूतार्थमात्रप्रतिपादनात्· लक्षण
याहितेभ्यः प्राशस्त्यं गम्येत· न च श्रौतस्यार्थस्य संभवे सा युक्ता· एकवाक्यतया च लक्षणा स्यात्। न च तस्यां प्रमाणमस्ति· तस्मा
धर्मा दानर्थक्यं· एवं मंत्रनामधेययोरपि दर्शयितव्यं· ताभ्यामपि धर्मप्रतीत्यनुदयात्· तस्मादेषामप्रामाण्यं· तेन समस्तो वेदः प्रमा एम
२

णमित्यवधारणं न सिध्यति सिद्धान्तस्तु विधिनामेकवाक्यत्वात्तत्स्तुत्यर्थेन विधीनां स्युः स्वाध्यायविधिना वेदः पुरुषार्थीयनीयते। सर्वस्तेना
र्थवादानां प्राशस्त्येन प्रमाणता स्वाध्यायाध्ययनविधिना दृष्टार्थत्वात्सकलस्य वेदस्य प्रयोजनवदर्थपर्यवसानं बोधितं अर्थवादानां च
भूतार्थप्रतिपादनेन प्रयोजनानवाप्तेर्यस्ततो लक्ष्यमाणः क्षिप्रदेवतासाध्यं कर्म। क्षिप्रमेव फलं दास्यतीति प्राशस्त्यरूपोऽर्थः सोऽनन्तरप्र
वृत्तविध्युद्देशाकांक्षितत्वात्तदाकांक्षांशंको निपूरयितुमिति गम्यते स्वाध्यायविधिरेव प्रयोजनवदर्थपर्यवसानं बोधयन् प्राशस्त्यपरतया
विनातदनुपपत्तेस्तात्पर्यमेषांगमयति तात्पर्याच्च लक्षणासिद्धिः ततश्चैकवाक्यत्वं। यत्तु दृष्टोऽर्थः स्वाध्यायविधिनानुसर्तव्यो न तदु
शेनार्थकत्वमेवेत्युक्तं। सत्यं। लाक्षणिकोऽप्यर्थो दृष्ट एव। दृश्यते हि श्रौतार्थद्वारेण तत्संबंध्यर्थान्तरे प्रत्ययः संभवति तु श्रौतपरत्वे तात्प
र्याभावाल्लक्षणानांगीक्रियते। अतश्च स्वाध्यायविधिनाऽर्थवादस्यापि पुरुषार्थपर्यवसानबोधनात्परंपरयापि दृष्टलाभे स्वर्गादिक
ल्पनानुपपत्तेर्भूतार्थमात्रस्याप्रयोजनत्वात्प्राशस्त्यपरत्वं लक्षणयांगीक्रियते। न हि पुरुषप्रवर्तनायां विधिरपेक्षते यत्तु स्वयमेव
विधिः समीहितुं शक्यते तथार्थविहितस्यौदुंबरत्वस्य फलवचनमनर्थकमित्यर्थवादत एवात्र विधिरुन्नेतव्यः। न च स्तुतिस्तेन विधिश

त्रिसुपजनय्यपुनस्तेनैव फलकल्पनासंभवति। वाक्यभेदप्रसंगात्। तस्मादर्थवादः। न चैवं विधेन कामशब्दरहितेन शक्यते फलं प्रति
३ पारयितुमिति पर्णमय्यधिकरणे वक्ष्यामः। अत्र तु साधनांशविचारमुखेनार्थवादत्वमुक्तं। तत्र तु साध्यांशविचारद्वारेणेति भेदः।
अथवा साध्यांशे [redacted] त्रैव विचारिते रात्रिसत्रन्यायेन फलपरत्वमेवापापश्लोकश्रवणादीनामाशंक्य निराकरिष्यते चतुर्थे।
३ न चौदुंबरतायाः फले विधीयमानायाः आश्रयो लभ्यते तत्रास्मादेव वाक्यादाश्रयकल्पनायां वाक्यभेदः पशुयागो हि प्रकृतः
सत्तावद्योग्यः। यत्र हि गुणः कारकतामापद्येत स आश्रयः। यथा होमो दध्नः। न चौदुंबरतारशक्नोति यागे कारकीभवितुं तदाश्रय
त्वेव यूपग्रहणानर्थक्यं अनुवादासंभवात्। यत्तु पशुनियोजनं यूपद्वारेण योग्यं तदपि सहयूपेनेवाप्रकृतं न च प्रकृतिवच्छ [redacted] द्धेन तस्य
संन्निधिसंभवः। स हि प्राकृतमित्संभावं सामान्येन संनिधापयति। तत्र न यूपस्य स्वरूपेणाविपरिवृत्तिरस्ति। अविपरिवर्तमानं
च न शक्नोत्याश्रयाकांक्षां पूरयितुं। तादृशी च विपरिवृत्तिर्जुह्वादीनामप्यस्तीति तेषामथाश्रयत्वं स्यात्. तत्र तथैव यूपग्रहणा
[redacted] नर्थक्यं तत्र वाक्येनैवाश्रयसंबंधे फलसंबंधे च विधीयमाने वाक्यभेदः। एकदेशिनां तु वाक्येनैवाश्रयसंबंधं फलसंबंधं राम
३

फलसंबंधं च गुणाधिकारेऽभ्युपगच्छतामिष्टापि तथैव संभवा यद्येकेन वाक्येन संबंधद्वयासंभवात् अप्रामाण्यमाशंक्य तन्निरासाय यस्तस्य
र्थत्वमापादितं तदनर्थकं। कश्चिदाह। यूपस्यादृष्टत्वात्तत्संबंधो दर्धिहोमसंबंधवन्न लोकतो लभ्यते ततस्तस्य फलसंबंधस्य चैने
कस्माद्वाक्यात्सिद्धिरिति। तदसत्। यद्यपि यूपत्वमदृष्टं तेन तु निमित्तेन यस्मिन्काष्ठे यूपशब्दो वर्तते तस्य चौदुंबरजातेश्च लौकिक एव सं
बंधः। यदि चैवं न लभ्यते खादिरं वीर्यकामस्य यूपं कुर्यादित्यत्रापि एकवाक्यता न स्यात्। अस्तु तत्र वाक्यभेद इति चेत्। वार्तमेतत्। एकवा
क्यत्वावगमात्। यदि चात्रैकस्मिन्नाख्याते वाक्यभेदस्तथा सत्यौदुंबरो यूपो भवत्यूर्जं पशूनामाप्नोतीत्याख्यातद्वये सुतरां वाक्यभेदादप्रामाण्यं
च संभवतीति दूरापेतमप्रामाण्यं। अथ खादिरो यूपो भवतीत्येतद्वाक्यविहितयूपसंबंधाश्रयणेन फलसंबंधविधिर्यः खादिरो यूपः स वी
र्यकामस्येति तथा सति खादिरत्वं न क्रत्वर्थं स्यात्। उक्थ्यादिवद्द्यूढवच्च फलार्थमेव स्यात्। उभयार्थं चेत्तदिष्टं खादिरत्वमुभयार्थं तां दधि
ग्रहस्य वदतो निबंधनकारस्यापि। तस्माद्यूपाश्रितस्य खादिरत्वस्य चौदुंबरत्वस्य फलार्थविधिसंभवान्नाप्रामाण्यशंकेत्यास्तां तावत्।
।तस्मादौदुंबरता यूपोद्देशेन विधीयते। न तत्कृतिरियमूर्जे विरुध्येदिति सिद्धं हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्यां। एवमानर्थक्यप्रतियोगिनो विधि

प्रतियोगिनश्चार्थवादाद्विचारितादिदानीं हेतुप्रतियोगिनो विचार्यते एवं श्रूयते शूर्पेण जुहोतीति तेनान्नं क्रियत इति। तत्र संदेहः किं शूर्
४ पेण होमे कर्तव्येऽन्नकरणता हेतुः उतार्थवाद इति। तत्र। हि शब्दश्रुत्या हेतुत्वं गम्यते हेतुस्त्वर्थवान् कः पुनरर्थो हेतोः। येन येनान्नं क्रिय
ते शूर्पादिना तेनापि दर्वीपिठरादिना तेनापि होमसिद्धिर्हेतोः प्रयोजनं। कथमप्रसिद्धायां व्याप्तौ हेतुव्यपदेशः अत एव हेतुनिर्देशाद्व्याप्ति
मन्तरेणानुपपद्यमानात् व्याप्तिवचनं कल्प्यते येन येनान्नं क्रियते तेन तेन होतव्यमिति। तेन वचनेन सन्निकरणविधायिना शूर्पस्या
पि होमसाधनत्वसिद्धेः शूर्पेण जुहोतीत्यवयुत्यानुवादः तेनेदृशमिदं वाक्यं श्रुतानुमितैकदेशनिष्पन्नं। शूर्पस्य होमसाधनत्वमन्न
करणत्वाद्धेतोः अतः शूर्पमप्यद्यापदन्नकरणं तेन होतव्यमिति पूर्वः पक्षः सिद्धान्तस्तु शूर्पस्य तृतीयाश्रुत्या करणत्वं गम्यते न तदा
नुमानिके दर्वीपिठरादिभिर्विकल्पितुमर्हति न च वेदेनोच्यमानं शूर्पस्य होमसाधनत्वं हेतुमपेक्षते वेदस्यैव तत्र प्रमाणत्वात् अ
र्थवादस्त्वयं स्तुत्या प्ररोचनार्थत्वेन तस्मादर्थवादत्वं। एवं चाप्रसिद्धव्याप्तिवचनकल्पनाक्लेशो न भविष्यति। क्रियत इति चावर्तमाने वर्त
माननिर्देशः प्ररोचनार्थत्वेन युक्तो भवति न हि भूते भाविनि वा तादृशी प्रीतिर्यादृशी वर्तमाने। तेन रुच्यर्थत्वेन लक्षणया वर्तमाननिर्देशो युक्तः। राम
विध्यर्थत्वे तु निष्प्रमाणकं लक्षणाश्रयणं। न च श्रौतेन वर्तमानान्नक्रियेण मुख्यान्नक्रियेण च शक्यते होमः कर्तुं। तस्मादर्थवादत्वं तदर्थशा ४

स्यात्॥ गतोऽर्थवादप्रसंगः मंत्रेष्विदानीं चिंता। तेषामप्याद्ये ऽधिकरणे आनर्थक्यमाशंक्य स्वाध्यायविधिवशेनार्थवत्त्या भवितव्यमित्येतावद् पर्यवसि

५ तं कथितं। न त्वपर्यवसानायेदानीं अर्थविशेषश्चिंत्यते तेषां च क्रमप्रकरणाभ्यां क्रत्वंगत्वं भवत्विति किं दृष्टेनैवार्थप्रकाशनोपकारेण भवति किं वोच्चार

5 णमात्रेणादृष्टं कुर्वतामिति। तत्र। यदि दृष्टार्थतैव स्यान्मंत्राम्नानमनर्थकं। प्रत्यायनाददृष्टं चेत्तदुच्चारणतो वरं। शक्यते ह्युपायांतरेणापि प्रयोगवेदु

लायामर्थप्रकाशनं। न यदि तावन्मात्रमेव कार्यं मंत्राणां स्यात् नित्यवदाम्नानमनर्थकं स्यात्। अथ तु मंत्रप्रत्यायनाददृष्टं कल्प्येत ततो प्रदूरमपि गत्वा

कल्प्यमदृष्टं तदुच्चारणादेव कल्पयितुं युक्तं। न हि पुरुषव्यापारगोचरः प्रत्यायनं तु तस्मिन्ननुष्ठिते स्वयमेव भवति। व्यापारे च पुरुषो नियुज्यते। यत्र च नि

युज्यते तत्र फलाकांक्षा। तेन यावश्यंभाविनी अदृष्टकल्पना सा तत्रैव युक्ता। ननु तस्य प्रत्यायनार्थत्वं। प्रत्यायनं चादृष्टार्थमिति युक्तं। तस्माददृष्टार्थमं

त्राः। तथा च तदर्थशास्त्राद्युपपत्तिः। इतरथा परिसंख्याद्याश्रयणे कुशाः स्यादिति॥ अत्राभिधीयते॥ यस्य दृष्टं न लभ्येत तस्यादृष्टकल्पना। अनुष्ठेयस्मृते स्यात्त

श्च दृष्टं मंत्रोच्चारणमर्थवत्। स्मरणं च प्रयोगार्थं प्रयोगाच्च फलोदयः। एवं दृष्टार्थतालाभान्नादृष्टपरिकल्पना॥ यत्तु मंत्रैरेव स्मर्तव्यमिति नियमः तस्य भा

न किंचिद् दृष्टमस्ति। स दृष्टं कल्प्यते। मंत्रोच्चारणस्य तु दृष्टेनैवार्थवित्त्वात्तत्रानुपपत्त्यकारणमदृष्टकल्पनमनवकाशं। तदर्थशास्त्रादयोऽपि गुणार्थार्थवा

र परिसंख्यादिभिः परिहृताः। तस्मात्प्रकाशनेनैव मंत्राणामुपकारिता। उपायनियमादेव त्वदृष्टपरिकल्पनं॥ इति शास्त्रदीपिकायां प्रथमाध्यायस्य द्विती यः पादः॥ एम ५